National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(58): 255-257
© 2025 NJHSR
www.sanskritarticle.com

**डा. ओंकार यशवंत सेलूकर**
सहायकाचार्य वेद विभाग,
श्री लालबहादूरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालय, नई दिल्ली- ११००१६

**Correspondence:**
**डा. ओंकार यशवंत सेलूकर**
सहायकाचार्य वेद विभाग,
श्री लालबहादूरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालय, नई दिल्ली- ११००१६

# श्रौतयज्ञानां महत्वम्।

**डा. ओंकार यशवंत सेलूकर**

**चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेवच।**
**हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः॥**

धन्याः वयं भारतीयाः यत्र आधुनिकवैज्ञानिकैः सह प्राचीन ऋषिवैज्ञानिकानामपि मार्गदर्शनेन अनुग्रहेन च वयं स्वलौकिकमाध्यत्मिकं चोन्नर्तिं साधयितुं शक्नुमः। यथा आधुनिकवैज्ञानिकाः मानवजीवनस्य कल्याणाय अनवरतं प्रयत्नं विधाय मानवानां लौकिकोन्नर्तिं साधयन्ति तथैव प्राचिनवैदिवैज्ञानिकाः ऋषयः अपि समस्तसृष्ट्युद्धाराय नानाविधयज्ञीयवैज्ञानिकप्रयोगान् विधाय आध्यात्मिकाधिदैविकाधि-भौतिकञ्चेति त्रिविधमुन्नर्तिं साधयन्ति स्म। अतः त्रिविधोन्नोर्तिं साधयितुं समर्थानां वैदिकयज्ञानां महत्वं वर्ततेतराम्।

**सर्वधर्ममूलकत्वेन यज्ञानां महत्वम्-**

पुरुषार्थचतुष्टयसाध्यमेव मानवजन्मस्यास्य सार्थकता। स पुरुषार्थः धर्मपूर्वकमेव साधनीयः। '**धर्मेण हीनः पशुभिः समानः**'[1] इत्यादिवचनान्यपि मानवानां धर्ममार्गे एव प्रवृत्तिं जनयन्ति। तर्हि कोऽयं धर्म इति जिज्ञासायां '**वेदोऽखिलो धर्ममूलम्**''[2] इत्यादीनि वचनानि वेदस्यैव सर्वधर्ममूलत्वं प्रतिपाद्य वैदिकमार्ग एव धर्मत्वेनानुसरणीय इति निर्दिशन्ति। वेदविज्ञानवेत्तार ऋषयो वैदिकं विज्ञानं प्रकारद्वयेनास्माकं समक्षं समुपस्थापितवन्तः। तत्रैकः साक्षाच्छब्दविन्यासमाध्यमेन संहिता-ब्राह्मण-श्रौतसूत्रादिरूपेण द्वितीयश्च वैदिकयज्ञीयकर्मकाण्डमाध्यमेन। एतत् मार्गद्वयं कर्ममार्गः ज्ञानमार्गश्चेति नाम्ना प्रसिद्धः। ध्यातव्यमस्त्यत्र यत् ' **वेदा हि यज्ञार्थमभिप्रवृत्ताः**'[3] इति वाक्यानुसारं तथा वैदिकसाहित्यस्यावलोकनेन च एतत् स्पष्टं भवति यत् वेदस्य प्रायः ९०% वेदभागः साक्षात् श्रौतकर्मकाण्डस्यैव प्रतिपादनाय प्रवृत्तः। अर्थात् वैदिककर्मकाण्डमाध्यमेनैव ऋषयो वैदिकविज्ञानं अस्मभ्यमुपदिष्टवन्तः। दुर्भाग्यवशात् यज्ञप्रक्रियानां जटिलताकारणात् मनुष्याणाम् आलस्यवशात् आजीवनं वैदिकयज्ञीयधर्मस्य पालनं कर्तुमशक्यत्वात् च वेदस्यास्य पूर्वार्धं यज्ञमार्गं विहाय अन्तिमवेदान्ताख्ये ज्ञानमार्ग एव प्रायः जनाः प्रवृत्ताः सन्ति। अनेन ज्ञायते यत् सामान्यतः जनेषु **"ऋते ज्ञानान्न मुक्तिः"** इति वचनप्राचुर्यत्वेन श्रुतत्वात् ज्ञानमार्गेनैवास्माकं मुक्तिरिति अव्याप्तदोषयुक्तो विचारः प्रचलितः। परिणामतः वेदस्य आदौ प्रतिपादितस्य यज्ञमार्गस्य अनुसरणं विहाय जनाः वेदान्तमार्ग एव रताः अभवन्निति दरीदृश्यते। अतः ध्यातव्यमत्र यत् वेदस्य प्रायः ९०% वेदभागः साक्षात् श्रौतकर्मकाण्डस्यैव प्रतिपादनात् वैदकयज्ञीयप्रक्रियानां महत्वं स्वतः एव वेदस्वरूपावलोकनेनैव स्पष्टं भवति। अतः वेदे आदौ यज्ञीयप्रयोगानामेव प्रतिपादनात् वदोक्तधर्माचरने यज्ञानां महती भूमिका दरीदृश्यते। उक्तं च श्रुत्या-

**"यज्ञेनयज्ञमयजन्ते देवास्तानि धर्माणि प्रथमान्यासन्"** इति।

**ज्ञानमार्गावगमनाय यज्ञानां भूमिका-**

पूर्वक्तानुसारं वैदिकधर्मः कर्ममार्ग उपासनामार्गश्चेति प्रकारद्वयेन अस्माकं पुरतः ऋषयः उपस्थापितवन्तः। **"ऋते ज्ञानान्न मुक्तिः"** इति वचनबलात् लोके एको बृहत् भ्रमः प्रचलितो वर्तते यत् ज्ञानं विना मुक्तेरभावात् ज्ञानमार्ग एवास्माकं गतिः स्युरिति। ये जनाः अनेन प्रकारेण यज्ञमार्गं विहाय मात्र

विद्यामार्ग एव रताः सन्ति, ऋष्यनुसारं ते तु घोरतम अज्ञानरूप्यन्धकारे प्रविशन्ति। उक्तं यथा ईशावास्योपनिषदि **"अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते। ततो भूय इव ते तमो य उ विद्यायाः रताः"** इति।[4]

अत्र ध्यातव्यमस्ति यत् ब्रह्मज्ञानविषयो अस्माकं कृते सर्वथा परोक्षविषयः। प्रत्यक्षभूतानां तत्त्वानामाधारेण साहाय्येन वा परोक्षत्तत्वानां ज्ञानं प्राप्तुं वयं सौकर्यमनुभवामः। मनुष्याणामीदृशीं मनोवृत्तिं मनसि निधाय एव ऋषय अपि प्रत्यक्षयज्ञीयप्रयोगानां माध्यमेन परोक्षदेवताविज्ञानं प्रतिपादयितुं यतन्ति स्म। अत एव चराचरजगद्व्याप्तं निराकारं निर्गुणं निर्विकल्पं अवाङ्मनसगोचरं गुह्यातिगुह्यतमं ब्रह्मतत्वं ज्ञापयितुमृषयः आदौ प्रत्यक्षं यज्ञविज्ञानमुपदिष्टवन्तः इति वैदिकसाहित्यावलोकनेन स्पष्टं भवति। अत एतेषां यज्ञीयप्रक्रियाणां प्रयोजनम् अवाङ्मनसगोचर-देवताज्ञानमेव (ब्रह्मज्ञानं) अस्तीत्यत्र न संशयः। यज्ञीयप्रयोगानां ब्रह्मज्ञानेन सह एकत्वं भगवता श्रीकृष्णेनापि उक्तं यथा -

**" तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्"** इति।[5]

अत उभयोः कर्मज्ञानमार्गयोः जीवने अनुष्ठानं अनिवार्यमस्तीति कारणादेव वेदे ईशावस्योपनिषदि स्पष्टरूपेण निगदितं यत् -

**"विद्यां चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते"** इति।[6]

चिन्तनीयोऽयं विषयः यत् भारतवर्षे विदेशे च सर्वत्र वेदोक्तविद्यायाः (ज्ञानमार्गस्य) प्रचारः प्रचुरतया अभवत् किन्तु कर्मकाण्डविज्ञानस्य सर्वथैव लोपो जातः। अतो यावत् श्रौतकर्मणामाधारेण ब्रह्मज्ञानाय मोक्षाय वा प्रयत्नो न विधीयते तावत् जनाः अन्धकार एव प्रविशन्ति इत्यत्र पूर्वोक्तं श्रुतिवचनमेव प्रमाणम्।

**नित्यकर्मत्वेन यज्ञानां विधानम्-**

सनातनशास्त्रे नित्य-नैमित्तिक-काम्येति कर्मणः त्रैविध्यं दृश्यते। तत्र यानि नित्यानि कर्माणि सन्ति तत्र सर्वत्र तेषां कर्मणां अतीत गंभीरस्वरूपमवगन्तव्यम्। येषाअननुष्ठाने अतीव अनिष्टपरिणामः अस्माकं शरीरे पर्यावरने वा भवतीत्यत्र न संशयः। अत एव शास्त्रे नित्यकर्मणः लक्षणे स्पष्टरूपेण उक्तं यत् '**अकृते प्रत्यवाय साधनत्वं नित्यत्वमिति**"[7]। अतः नित्यकर्मण्यस्मिन् फलविषयकं चिन्तनं विहाय कर्मस्यानुष्ठाने एव अधिकारं मत्वा तस्य अनुष्ठानं आजीवनं अनुष्ठीयते। तथाविधनित्यकर्मसु केषांचित् यज्ञीयकर्मणामनुष्ठानं श्रुत्या विहितमस्ति। यज्ञीयकर्मणां जीवने अनिवार्यतया अनुष्ठानं उपदिष्टं यथा -

**" कुर्वन्नेवह कर्माणि जिजीवेषेत् शतं समाः"** इति।[8]

अतः देवताज्ञानाय मोक्षप्राप्तुं वा मनुष्यैः आजीवनं कर्ममार्गमेवानुसरेयुः इति धिया नित्यकर्मसु यज्ञानामनुष्ठानं विधाय **"नान्यः पन्था विद्यतेऽयनाय"** इत्यपि निर्दिशति श्रुतिः।[9]

**यज्ञाः वेदस्य प्रत्यक्षविज्ञानपरकाः-**

ऋषिभिः उपदिष्टं वेदज्ञानं शब्दराशीरूपेणास्माकं समक्षमुपस्थित-मस्ति। वेदोक्तमेतद्विज्ञानं वेदाङ्गानां सहाय्येन शब्दार्थज्ञानेन वयं ज्ञातुं प्रयत्नं कुर्मः। किन्तु मात्र शब्दार्थज्ञानमात्रेण वेदोक्तं विज्ञानं न सफलीभवति। वेदे संहितायां ब्राह्मणे श्रौतसूत्रे चादौ यज्ञानामेवानुष्ठानं विहितम्। वयं सर्वे जानीमः यत् यज्ञाः वेदस्य प्रायोगिकज्ञानविषयाः सन्ति। अतो ग्रन्थमात्रावलोकनेन यज्ञीय-विद्यायाः ज्ञानं न कदापि भवितुं शक्यते। यथा सैनिकानां कृते शस्त्रस्य प्रयोगज्ञानस्य साक्षात् प्रयोगकरणेनैव सिद्धिर्भवति न तु केवलशस्त्रविषयकज्ञानमात्रेण तस्य शस्त्रस्य प्रयोगं कर्तुं सैनिकाः समर्थाः भवन्ति। तथैव यज्ञविज्ञानाध्ययने प्रवृत्ताः छात्राः अपि न केवलं यज्ञीयग्रन्थज्ञानेनैव प्रयोगविज्ञानं कर्तुं प्रभवन्ति। अपितु यज्ञीयप्रयोगानां साक्षात् प्रयोगज्ञानेनैव तेषां वास्तविकं विज्ञानं अवगन्तुं पारयामः। अतो यज्ञविज्ञानं विना वैदिकविज्ञानाध्ययनस्य कल्पना वयं नैव कर्तुं शक्नुमः। तात्पर्यतः वैदिकविज्ञानं प्रत्यक्षीकर्तुं वयं इच्छामश्चेत् यज्ञानां मूर्तस्वरूपत्वात् यज्ञीयकर्मणां प्रत्यक्षप्रयोगं कृत्वैव वेदोक्तं विज्ञानस्य प्रत्यक्षीकर्तुं शक्नुमः।

**सृष्ट्युद्धारकाः इमे यज्ञाः-**

यथा आधुनिकवैज्ञानिकाः वैज्ञानिकप्रयोगशालायां (science laboratory) विविधान् बहुमुल्यप्रयोगान् कुर्वन्तः वैज्ञानिक-सिद्धान्तानां साफल्यमनुभवन्ति; तथैव शाश्वतविज्ञानप्रतिपादकानां प्राचीनवैज्ञानिकानां ऋषिमहर्षीणां यज्ञीयवेदिः एव प्रयोशाला आसीत्। यत्र समस्तजीवोपकाराय ऋषयः यान् नानाविधान् वैज्ञानिकप्रयोगान् कृतवन्तः ते समस्तप्रयोगाः यज्ञपदाभिधेयाः सन्ति। वेदोक्ताः एते सर्वेऽपि प्रयोगाः समग्रसृष्ट्युद्धारकाः सन्ति इत्यत्र न सन्देहः। वेदोक्तं किमपि यज्ञीयकर्म तादृशं नास्ति येन जीवानां हानिर्भवति। चराचरजगदुद्धारायचिन्तनशीलाः ऋषयः समस्त-जीवानां कल्यानाय यज्ञविद्यामुपदिष्टवन्तः। जीवः येन केनापि प्रयोजनेन यज्ञानुष्ठानं कुर्यात् समेषां यज्ञानां सामान्यफलं **'यज्ञाद्भवति पर्जन्यः'**[10] इति वाक्येन भगवता निर्दिष्टम्। पर्जन्यादन्नसम्भवति अन्नात् विविधजीवानां चोत्पत्तिः। अनेन प्रकारेन यज्ञाः सृष्ट्युद्धारकाः सन्ति।

**सर्वं यज्ञात् प्रसिद्धति-**

प्राचिनदैवीकालादेव यज्ञाः सर्वकामनापूरकाः आसन्। देवाः यत् किमपि प्राप्तुमिच्छन्ति स्म तत्सर्वं यज्ञेनैव ते साधितवन्तः। साक्षात् ब्रह्मा यदा इमां सृष्टिं जनयितुमिच्छितम् तदा यज्ञेनैवेमां सृष्टिं ससर्ज। शतपथब्राह्मणे द्वितीयकाण्डे चातुर्मासयागान्तर्गत वैश्वदेवपर्वस्य व्याख्यानसमये यज्ञेन ब्रह्मा सृष्टिं ससर्ज इति सोदाहरणं व्याख्यानं कृत्वा निर्दिष्टम्। यज्ञादुत्पन्नास्य जगतः पालनं पोषणमपि यज्ञेनैव भवति। यज्ञानां जगत् पोषणपरकत्वं भगवता श्रीकृष्णेनापि उक्तं यथा **"अन्नाद्भवन्ति भूतानि पर्जन्यादन्न संभवः। यज्ञाद्भ्ववति पर्जन्यः यज्ञकर्मसमुद्भवः"** इति।[11]

यदि मनुष्याः देवाः वा केनापि व्याधिना ग्रस्थाः भवन्ति चेत् तेषामुपचारोऽपि यज्ञीयचिकित्सया भावयन्ति स्म। चातुर्मास-यागान्तर्गत वरुणप्रघासपर्व यज्ञीयचिकित्सायाः उदाहरणमस्ति। दर्शेष्टौसान्नाय्यहविप्रदानेन च सौत्रामणीयागद्वारा इन्द्रदेवतायाः चिकित्सा अपि वैदिकसाहित्ये यज्ञीयचिकित्सायाः प्रसिद्धोदहरनाणि सन्ति।

शत्रुसकात् संरक्षणाय युद्धे जयप्रासुं वा साकमेधादिपर्वण एवं श्येनयादिशत्रुवधनिमित्तस्य यज्ञानुष्ठानस्य विधानमपि वेदे विहितम्। अनेन प्रकारेन वैदियज्ञीयोपायेन शत्रुसकाशात् समाजस्य संरक्षणमपि यज्ञात् साधयितुं शक्यते।

अस्याः सृष्टेः सुष्टु संचालनाय अनवरतं कार्यरताः शक्तयः देवतापदवाच्याः सन्ति। ते देवा अपि यज्ञेनैव पुष्टाः प्रसन्नाः प्रबलाश्च भवन्ति। पुष्टाः ते देवा अपि प्रसन्नचेतसा पुनः सोत्साहेन सृष्टिकार्यं सम्पादयन्ति। एवं यज्ञद्वारा देवतानां मनुष्याणां च परस्परोपकारव्यवहारः गीतायां भगवताऽपि निर्दिष्टः यथा- देवान् भावयतानेन ते देवा भावयन्तु वः। परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥

न केवलं देवानां अपितु पितॄणामपि तर्पणं पिण्डपितृयज्ञद्वारा भवति। अनेन प्रकारेण देव-मनुष्य-पितॄणां समेषां कल्याणपरकत्वात् यज्ञीयकर्मणामत्यन्तं महत्वं दरीदृश्यते।

यथा देवाः यज्ञमाध्यमेनैव सर्वमिष्टं साधयन्ति तथैव मनुष्या अपि सर्वान्नपि मनोरथान् यज्ञेनैव साधयितुं शक्नुवन्ति। अत एव कात्यायनश्रौतसूत्रे **"आग्नेयम् यथाकामम्"**[12] इति वचनेन आग्नेयेष्टियागं सर्वकामनासम्पूर्तये विहितम्। तात्पर्यतः पृथिवितले कल्पतरु इव अयं यज्ञपरंपरा समेषां कल्याणाय ऋषिभिरुपदिष्टा येन मनुष्या यथेष्टं सर्वं साधयुतुं शक्नोति।

अन्ततो गत्वा एतदेव प्रदिपादयितुमिच्छामि यत् चराचरगदिदं यज्ञस्यैव परिणामभूतम्। अत एव श्रुति **"अग्नीषोमात्मकं जगत्"**[13] इति वचनेन अग्नीषोमात्मकस्य यज्ञस्यैव सर्वजगदाधाभूतत्वं प्रतिपादयति। सोऽयं यज्ञः सृष्टौ नाना प्रकारेन अनवरतं प्रचलन्नस्ति। शरीरे आध्यात्मयज्ञरूपेण, स्वाध्यायसमये ज्ञानयज्ञः स्वाध्याय-यज्ञश्चापि गीतायां विहितः। पंचमहायज्ञानां स्वरूमपि वयं सर्वे जानिमः इत्यादिरूपेण सर्वत्र विराजमानोऽयं यज्ञपुरुषः सर्वत्र व्याप्तत्वादेव विष्णुशब्देन श्रुतिः प्रशंसति यथा **"यज्ञो वै विष्णुः"**[14] इति। एवं यथामतिं यज्ञपुरुषस्यास्य सर्वव्यापकत्वं स्वरूपं महत्वं च विधाय अत्रैव अतिविस्तारभायात् विरमामि।

**सन्दर्भ ग्रन्थः -**


1 हितोपदेशः

2 मनुस्मृति २.६

3 वेदांगज्योतिष- याजुषज्योतिष श्लोक ३

4 ईशावास्योपनिषद्

5 भगवद्गीता ३/१५

6 ईशावास्योपनिषद्

7 वेदान्तसार

8 ईशावास्योपनिषद्

9 ईशावास्योपनिषद्

10 भगवद्गीता- ३/१४

11 भगवद्गीता- ३/१४

12 कत्यायनश्रौतसूत्रम्- अध्याय् ४

13 शतपथब्राह्मणम्

14 बृगद्ग्यावालोपनिषद्